श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ अवतारगीतम् ॥

*This document[*] has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

[*]This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ अवतारगीतम् ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

पाण्ड्यभूपतेः पुण्यमूर्तये
    सागरान्तरातन्वते गतिम्।
वेधसे पुरा वेददायिने
    मीनरूपिणे ते नमो नमः ॥ १ ॥

मन्दराचलं बिभ्रते सुखं
    देवदानवाकृष्टमञ्जसा।
सम्यगाहितं स्वेन पाणिना
    कूर्मरूपिणे ते नमो नमः ॥ २ ॥

अम्बुधेर्जले दैत्यमज्जितां
    रक्षितुं धरां वेधसो नसः।
जन्मकारिणे यज्ञमूर्तये
    क्रोडरूपिणे ते नमो नमः ॥ ३ ॥

गर्भगोऽपि यं नारदेरितं
    चित्तगर्भगं स्तम्भगर्भगम्।
अर्भको व्यधात्त्वां तदा मुदा
    सिंहरूपिणे ते नमो नमः ॥ ४ ॥

भिक्षवे क्षितेः भक्तपुत्रजा-
    न्मानघातिने मानकारिणे।
गोत्रभेदिने तत्प्रदायिने
    खर्व! ते नमो वृद्धिमीयुषे ॥ ५ ॥

www.prapatti.com

दत्तदत्तया मत्तया श्रिया
    बाहुपूरितं बाहुजं पुरा।
छिन्नबाहुकं हन्त ! तन्वते
    रामरूपिणे ते नमो नमः ॥ ६ ॥

यज्ञरक्षिणे जानकीयुजे
    यायिने वनं यातुघातिने।
सेतुकारिणे शर्मदायिने
    रामरूपिणे ते नमो नमः ॥ ७ ॥

सीरपाणये नीलवाससे
    शेषमूर्तयेऽशेषवाहिने।
हस्तिनानदीकर्षिणे क्रुधा
    रामरूपिणे ते नमो नमः ॥ ८ ॥

देवकीभुवे नन्दनन्दिने
    गोविहारिणे गोपबन्धवे।
वेणुगायिने वेत्रपाणये
    कृष्णरूपिणे ते नमो नमः ॥ ९ ॥

भाविने कलेरन्तकारिणे
    कल्किरूपिणे ते नमो नमः।
इत्थमुच्चरन्नीशमानम-
    न्नीप्सितं जनो विन्दतेऽखिलम् ॥ १० ॥

॥ इति अवतारगीतं समाप्तम् ॥

www.prapatti.com